प्र० पु०	अदेविष्यत्	अदेविष्यताम्	अदेविष्यन्
म० पु०	अदेविष्यः	अदेविष्यतम्	अदेविष्यत
उ० पु०	अदेविष्यम्	अदेविष्याव	अदेविष्याम

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निम्नलिखित धातुओं के प्रथम पुरुष में एकवचन के रूप।—

संस्कृत	हिन्दी	इंगलिश	लट्	लिट्	लुट्
सिव्	= सीना	To Sew	सीव्यति	सिषेव	सेविता
नृत्	= नाचना	To dance	नृत्यति	ननर्त	नर्तिता
णश् (नश्)	नाश होना	To perish	नश्यति	ननाश	नशिता
शम् (शाम्)	शान्त होना	To subside	शाम्यति	शशाम	शमिता
भ्रम् (भ्राम्)	घूमना	To roam	भ्राम्यति	बभ्राम	भ्रमिता
व्यध् (विध्य)	विंधना,मारना	To pierce	विध्यति	विव्याध	व्यद्धा
पुष्	पोषण करना	To cherish	पुष्यति	पुपोष	पोष्टा
क्रुध्	क्रोध करना	To anger	क्रुध्यति	चुक्रोध	क्रोद्धा
स्निह्	प्यार करना	To love	स्निह्यति	सिष्णेह	स्नेहिता
द्रुह्	द्रोह करना	To spite	द्रुह्यति	दुद्रोह	द्रोहिता
मुह्	मोहना	To charm	मुह्यति	मुमोह	मोहिता
सिध्	सिद्ध होना	To prove	सिध्यति	सिषेध	सेद्धा

द्वितीयः पाठः

आत्मनेपद

जन् (जा)=पैदा होना To bear or originate.

'लट्' वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	जायते	जायेते	जायन्ते
म० पु०	जायसे	जायेथे	जायध्वे
उ० पु०	जाये	जायावहे	जायामहे

'लिट्' परोक्षभूतकाल

प्र० पु०	जज्ञे	जज्ञाते	जज्ञिरे
म० पु०	जज्ञिषे	जज्ञाथे	जज्ञिध्वे
उ० पु०	जज्ञे	जज्ञिवहे	जज्ञिमहे

'लुट्' अनद्यतन भविष्यत् काल

प्र० पु०	जनिता	जनितारौ	जनितारः
म० पु०	जनितासे	जनितासा	जनिताध्वे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लृट्	लोट्	लङ्	विधिलिङ्	आशीर्लिङ्	लुङ्	लृङ्
सेविष्यति	सीव्यतु	असीव्यत्	सीव्येत्	सीव्यात्	असेवीत्	असेविष्यत्
नर्तिष्यति	नृत्यतु	अनृत्यत्	नृत्येत्	नृत्यात्	अनर्तीत्	अनर्तिष्यत्
नशिष्यति	नश्यतु	अनश्यत्	नश्येत्	नश्यात्	अनशत्	अनशिष्यत्
शमिष्यति	शाम्यतु	अशाम्यत्	शाम्येत्	शाम्यात्	अशमत्	अशमिष्यत्
भ्रमिष्यति	भ्राम्यतु	अभ्राम्यत्	भ्राम्येत्	भ्राम्यात्	अभ्रमत्	अभ्रमिष्यत्
व्यत्स्यति	विध्यतु	अविध्यत्	विध्येत्	विध्यात्	अव्यात्सीत्	अव्यत्स्यत्
पोक्ष्यति	पुष्यतु	अपुष्यत्	पुष्येत्	पुष्यात्	अपुषत्	अपोक्ष्यत्
क्रोत्स्यति	क्रुध्यतु	अक्रुध्यत्	क्रुध्येत्	क्रुध्यात्	अक्रुधत्	अक्रोत्स्यत्
स्नेहिष्यति	स्निह्यतु	अस्निह्यत्	स्निह्येत्	स्निह्यात्	अस्निहत्	अस्नेहिष्यत्
द्रोहिष्यति	द्रुह्यतु	अद्रुह्यत्	द्रुह्येत्	द्रुह्यात्	अद्रुहत्	अद्रोहिष्यत्
मोहिष्यति	मुह्यतु	अमुह्यत्	मुह्येत्	मुह्यात्	अमुहत्	अमोहिष्यत्
सेत्स्यति	सिध्यतु	असिध्यत्	सिध्येत्	सिध्यात्	असिधत्	असेत्स्यत्

उ० पु०	जनिताहे	जनितास्वहे	जनितास्महे

'लृट्' सामान्य भविष्यत्काल

प्र० पु०	जनिष्यते	जनिष्येते	जनिष्यन्ते
म० पु०	जनिष्यसे	जनिष्येथे	जनिष्यध्वे
उ० पु०	जनिष्ये	जनिष्यावहे	जनिष्यामहे

'लङ्' अनद्यतन भूतकाल

प्र० पु०	अजायत	अजायेताम्	अजायन्त
म० पु०	अजायथाः	अजायेथाम्	अजायध्वम्
उ० पु०	अजाये	अजायावहि	अजायामहि

'लुङ्' सामान्य भूतकाल

प्र० पु०	अजनि = अजनिष्ट	अजनिषाताम्	अजनिषत
म० पु०	अजनिष्ठाः	अजनिषाथाम्	अजनिध्वम्
उ० पु०	अजनिषि	अजनिष्वहि	अजनिष्महि

'लोट्' आज्ञावाचक

प्र० पु०	जायताम्	जायेताम्	जायन्ताम्
म० पु०	जायस्व	जायेथाम्	जायध्वम्
उ० पु०	जायै	जायावहै	जायामहै

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विधिलिङ्

प्र० पु०	जायेत	जायेयाताम्	जायेरन्
म० पु०	जायेथाः	जायेयाथाम्	जायेध्वम्
उ० पु०	जायेय	जायेवहि	जायेमहि

आशीर्लिङ्

प्र० पु०	जनिषीष्ट	जनिषीयास्ताम्	जनिषीरन्
म० पु०	जनिषीष्ठाः	जनिषीयास्थाम्	जनिषीध्वम्
उ० पु०	जनिषीय	जनिषीवहि	जनिषीमहि

'लृङ्' हेतुहेतुमद्भावभविष्यत्

प्र० पु०	अजनिष्यत	अजनिष्येताम्	अजनिष्यन्त
म० पु०	अजनिष्यथाः	अजनिष्येथाम्	अजनिष्यध्वम्
उ० पु०	अजनिष्ये	अजनिष्यावहि	अजनिष्यामहि

बुध् = जानना To understand

'लट्' वर्तमान काल

प्र० पु०	बुध्यते	बुध्येते	बुध्यन्ते
म० पु०	बुध्यसे	बुध्येथे	बुध्यध्वे
उ० पु०	बुध्ये	बुध्यावहे	बुध्यामहे

'लङ्' अनद्यतन भूतकाल

प्र० पु०	अबुध्यत	अबुध्येताम्	अबुध्यन्त
म० पु०	अबुध्यथाः	अबुध्येथाम्	अबुध्यध्वम्
उ० पु०	अबुध्ये	अबुध्यावहि	अबुध्यामहि

'लुङ्' सामान्य भूतकाल

प्र० पु०	अबोधि = अबुद्ध	अभुत्साताम्	अभुत्सत
म० पु०	अबुद्धाः	अभुत्साथाम्	अबुद्ध्वम्
उ० पु०	अभुत्सि	अभुत्स्वहि	अभुत्स्महि

'लृट्' सामान्य भविष्यत्काल

प्र० पु०	भोत्स्यते	भोत्स्येते	भोत्स्यन्ते
म० पु०	भोत्स्यसे	भोत्स्येथे	भोत्स्यध्वे
उ० पु०	भोत्स्ये	भोत्स्यावहे	भोत्स्यामहे

'लोट्' आज्ञावाचक

प्र० पु०	बुध्यताम्	बुध्येताम्	बुध्यन्ताम्
म० पु०	बुध्यस्व	बुध्येथाम्	बुध्यध्वम्
उ० पु०	बुध्यै	बुध्यावहै	बुध्यामहै

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विधिलिङ्

प्र० पु०	बुध्येत	बुध्येयाताम्	बुध्येरन्
म० पु०	बुध्येथाः	बुध्येयाथाम्	बुध्येध्वम्
उ० पु०	बुध्येय	बुध्येवहि	बुध्येमहि

आशीर्लिङ्

प्र० पु०	भुत्सीष्ट	भुत्सीयास्ताम्	भुत्सीरन्
म० पु०	भुत्सीष्ठाः	भुत्सीयास्थाम्	भुत्सीध्वम्
उ० पु०	भुत्सीय	भुत्सीवहि	भुत्सीमहि

'लृङ्' हेतुहतुमद्भाव भविष्यत्

प्र० पु०	अभोत्स्यत	अभोत्स्येताम्	अभोत्स्यन्त
म० पु०	अभोत्स्यथाः	अभोत्स्येथाम्	अभोत्स्यध्वम्
उ० पु०	अभोत्स्ये	अभोत्स्यावहि	अभोत्स्यामहि

युध्=लड़ना To Fight

'लट्' वर्तमान काल

प्र० पु०	युध्यते	युध्येते	युध्यन्ते
म० पु०	युध्यसे	युध्येथे	युध्यध्वे
उ० पु०	युध्ये	युध्यावहे	युध्यामहे

'लङ्' अनद्यतन भूतकाल

प्र० पु०	अयुध्यत	अयुध्येताम्	अयुध्यन्त
म०पु०	अयुध्यथाः	अयुध्येथाम्	अयुध्यध्वम्
उ० पु०	अयुध्ये	अयुध्यावहि	अयुध्यामहि

'लुङ्' सामान्य भूतकाल

प्र० पु०	अयुद्ध	अयुत्साताम्	अयुत्सत
म० पु०	अयुद्धाः	अयुत्साथाम्	अयुद्ध्वम्
उ० पु०	अयुत्सि	अयुत्स्वहि	अयुत्स्महि

'लृट्' भविष्यत्काल

प्र० पु०	योत्स्यते	योत्स्येते	योत्स्यन्ते
म० पु०	योत्स्यसे	योत्स्येथे	योत्स्वध्वे
उ० पु०	योत्स्ये	योत्स्यावहे	योत्स्यामहे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'लोट्' आज्ञावाचक

प्र० पु०	युध्यताम्	युध्येताम्	युध्यन्ताम्
म० पु०	युध्यस्व	युध्येथाम्	युध्यध्वम्
उ० पु०	युध्यै	युध्यावहै	युध्यामहै

विधि लिङ्

प्र० पु०	युध्येत	युध्येयाताम्	युध्येरन्
म० पु०	युध्येथाः	युध्येयाथाम्	युध्यध्वम्
उ० पु०	युध्येय	युध्येवहि	युध्येमहि

आशीर्लिङ्

प्र० पु०	युत्सीष्ट	युत्सीयास्ताम्	युत्सीरन्
म० पु०	युत्सीष्ठाः	युत्सीयास्थाम्	युत्सीध्वम्
उ० पु०	युत्सीय	युत्सीवहि	युत्सीमहि

हेतुहेतुमद्भावभविष्यत्

प्र० पु०	अयोत्स्यत	अयोत्स्येताम्	अयोत्स्यन्त
म० पु०	अयोत्स्यथाः	अयोत्स्येथाम्	अयोत्स्यध्वम्
उ० पु०	अयोत्स्ये	अयोत्स्यावहि	अयोत्स्यामहि

क्लिश्=क्लेश पाना To trouble

'लट्' वर्तमान काल

प्र० पु०	क्लिश्यते	क्लिश्येते	क्लिश्यन्ते
म० पु०	क्लिश्यसे	क्लिश्येथे	क्लिश्यध्वे
उ० पु०	क्लिश्ये	क्लिश्यावहे	क्लिश्यामहे

'लङ्' अनद्यतनभूत

प्र० पु०	अक्लिश्यत	अक्लिश्येन्ताम्	अक्लिश्यन्त
म० पु०	अक्लिश्यथाः	अक्लिश्येथाम्	अक्लिश्यध्वम्
उ० पु०	अक्लिश्ये	अक्लिश्यावहि	अक्लिश्यामहि

'लुङ्' सामान्य भूतकाल

प्र० पु०	अक्लेशिष्ट	अक्लेशिषाताम्	अक्लेशिषत
म० पु०	अक्लेशिष्ठाः	अक्लेशिषाथाम्	अक्लेशिध्वम्
उ० पु०	अक्लेशिषि	अक्लेशिष्वहि	अक्लेशिष्महि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'लृट्' सामान्य भविष्यत्काल

प्र० पु०	क्लेशिष्यते	क्लेशिष्येते	क्लेशिष्यन्ते
म० पु०	क्लेशिष्यसे	क्लेशिष्येथे	क्लेशिष्यध्वे
उ० पु०	क्लेशिष्ये	क्लेशिष्यावहे	क्लेशिष्यामहे

'लोट्' आज्ञावाचक

प्र० पु०	क्लिश्यताम्	क्लिश्येताम्	क्लिश्यन्ताम्
म० पु०	क्लिश्यस्व	क्लिश्येथाम्	क्लिश्यध्वम्
उ० पु०	क्लिश्यै	क्लिश्यावहै	क्लिश्यामहै

विधिलिङ्

प्र० पु०	क्लिश्येत	क्लिश्येयाताम्	क्लिश्येरन्
म० पु०	क्लिश्येथाः	क्लिश्येयाथाम्	क्लिश्येध्वम्
उ० पु०	क्लिश्येय	क्लिश्येवहि	क्लिश्येमहि

आशीर्लिङ्

प्र० पु०	क्लेशिषीष्ट	क्लेशिषीयास्ताम्	क्लेशिषीरन्
म० पु०	क्लेशिषीष्ठाः	क्लेशिषीयास्थाम्	क्लेशिषीध्वम्
उ० पु०	क्लेशिषीय	क्लेशिषीवहि	क्लेशिषीमहि

'लृङ्' हेतुहतुमद्भावभविष्यत्

प्र० पु०	अक्लेशिष्यत	अक्लेशिष्येताम	अक्लेशिष्यन्त
म० पु०	अक्लेशिष्यथाः	अक्लेशिष्येथाम्	अक्लेशिष्यध्वम्
उ० पु०	अक्लेशिष्ये	अक्लेशिष्यावहि	अक्लेशिष्यामहि

उभयपदी

मृष् = सहन करना To Sustain, to bear

'लट्' वर्तमानकाल

	परस्मैपद			आत्मनेपद		
प्र० पु०	मृष्यति	मृष्यतः	मृष्यन्ति	मृष्यते	मृष्येते	मृष्यन्ते
म० पु०	मृष्यसि	मृष्यथः	मृष्यथ	मृष्यसे	मृष्येथे	मृष्यध्वे
उ० पु०	मृष्यामि	मृष्यावः	मृष्यामः	मृष्ये	मृष्यावहे	मृष्यामहे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

लिट् परोक्षभूतकाल

प्र० पु०	ममर्ष	ममृषतुः	ममृषुः	ममृषे	ममृषाते	ममृषिरे
म० पु०	ममर्षिथ	ममृषथुः	ममृष	ममृषिषे	ममृषाथे	ममृषिध्वे
उ० पु०	ममर्ष	ममृषिव	ममृषिम	ममृषे	ममृषिवहे	ममृषिमहे

'लङ्' अनद्यतनभूतकाल

प्र० पु०	अमृष्यत्	अमृष्यताम्	अमृष्यन्	अमृष्यत	अमृष्येताम्	अमृष्यन्त
म० पु०	अमृष्यः	अमृष्यतम्	अमृष्यत	अमृष्यथाः	अमृष्येथाम्	अमृष्यध्वम्
उ० पु०	अमृष्यम्	अमृष्याव	अमृष्याम	अमृष्ये	अमृष्यावहि	अमृष्यामहि

लुङ् सामान्य भूतकाल

प्र० पु०	अमर्षीत्	अमर्षिष्टाम्	अमर्षिषुः	अमर्षिष्ट	अमर्षिषाताम्	अमर्षिषत
म० पु०	अमर्षीः	अमर्षिष्टम्	अमर्षिष्ट	अमर्षिष्ठाः	अमर्षिषाथाम्	अमर्षिढ्वम्
उ० पु०	अमर्षिषम्	अमर्षिष्व	अमर्षिष्म	अमर्षिषि	अमर्षिष्वहि	अमर्षिष्महि

लृट् सामान्य भविष्यत्काल

प्र० पु०	मर्षिष्यति	मर्षिष्यतः	मर्षिष्यन्ति	मर्षिष्यते	मर्षिष्येते	मर्षिष्यन्ते
म० ०	मर्षिष्यसि	मर्षिष्यथः	मर्षिष्यथ	मर्षिष्यसे	मर्षिष्येथे	मर्षिष्यध्वे
उ० पु०	मर्षिष्यामि	मर्षिष्यावः	मर्षिष्यामः	मर्षिष्ये	मर्षिष्यावहे	मर्षिष्यामहे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'लोट्' आज्ञावाचक

प्र० पु०	मृष्यतु = मृष्यतात्	मृष्यताम्	मृष्यन्तु	मृष्यताम्	मृष्येताम्	मृष्यन्ताम्
म० पु०	मृष्य = मृष्यतात्	मृष्यतम्	मृष्यत	मृष्यस्व	मृष्येथाम्	मृष्यध्वम्
उ० पु०	मृष्यानि	मृष्याव	मृष्याम	मृष्यै	मृष्यावहै	मृष्यामहै

विधिलिङ्

प्र० पु०	मृष्येत्	मृष्येताम्	मृष्येयुः	मृष्येत	मृष्येयाताम्	मृष्येरन्
म० पु०	मृष्येः	मृष्येतम्	मृष्येत	मृष्येथाः	मृष्येयाथाम्	मृष्येध्वम्
उ० पु०	मृष्येयम्	मृष्येव	मृष्येम	मृष्येय	मृष्येवहि	मृष्येमहि

आशीर्लिङ्

प्र० पु०	मृष्यात्	मृष्यास्ताम्	मृष्यासुः	मर्षिषीष्ट	मर्षिषीयास्ताम्	मर्षिषीरन्
म० पु०	मृष्याः	मृष्यास्तम्	मृष्यास्त	मर्षिषीष्ठाः	मर्षिषीयास्थाम्	मर्षिषीढ्वम्
उ० पु०	मृष्यासम्	मृष्यास्व	मृष्यास्म	मर्षषीय	मर्षिषीवहि	मर्षिषीमहि

'लृङ्' हेतुहेतुमद्भावभविष्यत्

प्र० पु०	अमर्षिष्यत्	अमर्षिष्यताम्	अमर्षिष्यन्	अमर्षिष्यत	अमर्षिष्येताम्	अमर्षिष्यन्त
म० पु०	अमर्षिष्यः	अमर्षिष्यतम्	अमर्षिष्यत	अमर्षिष्यथाः	अमर्षिष्येथाम्	अमर्षिष्यध्वम्
उ० प०	अमर्षिष्यम्	अमर्षिष्याव	अमर्षिष्याम	अमर्षिष्ये	अमर्षिष्यावहि	अमर्षिष्यामहि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तृतीयः पाठः

दिवादिगण के उदाहरण

१—राजा शकुनिः पाशैः (अक्षैः) दिदेव = King Shakuni gambled with dices राजा शकुनि ने पासों से जुआ खेला।

२—किं सौचिकोऽङ्गरक्षिकां सीव्यति ? = Does the toilor sew the shirt क्या दर्जी कमीज सीता है ?

३—व्याधो बाणेन मृगमविध्यत् = The hunter hunted the deer with the arrow व्याध ने बाण से मृग को विध दिया।

४—पुरुषार्थं विना कोऽपि कार्यं नहि सिध्यति = Any work does not complete (accomplish) without labour पुरुषार्थ के बिना कोई काम नहीं सिद्ध होता है।

५—शनैः शनैः सर्वं धनमनश्यत् = All money perished slowly (gradually) सब धन धीरे धीरे नाश हो गया।

६—रवीन्द्रः त्वया सह अस्निहत् = Ravindra loved thee रवीन्द्र ने तेरे साथ प्रेम किया था।

७—स मह्यं द्रुह्यति = He envies me वह मुझसे द्रोह करता है।

८—वयं केभ्योऽपि न द्रुह्येम = We should not spite any body हमें किसी से भी द्रोह नहीं करना चाहिये।

९—स मयि मुह्यति—He is attracted towards to me वह मेरे ऊपर मोहित (मुग्ध) होता है।

१०—विहगाः वियति उदडीयन्त—Birds flew in the sky पक्षी आकाश में उड़ गये।

११—देवेन्द्रस्य गृहे शिशुः जज्ञे (अजनिष्ट)—A baby was born in Davendra's house देवेन्द्र के घर में लड़का पैदा हुआ।

१२—सुवर्णोऽग्नौ-अतिदीप्यते—Gold shines more in the fire सोना अग्नि में अधिक चमकता है।

१३—सैनिकाः युद्धभूमौ युयुधिरे (अयुध्यन्त)—The Soldiers fought in the battle-field. सिपाही युद्ध में लड़े।

१४—अग्निः वारिभिः शाम्यति—The fire subsides with the water. अग्नि पानी से शान्त होती है।

१५—शान्तिरत्यमृष्यत—Shanti sustained much शान्ति ने बहुत सहन किया।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अभ्यास

हिन्दी में अनुवाद कीजिये—

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ॥१॥
न जायते म्रियते वा कदाचित् ॥२॥
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥३॥
सत्यादुत्पद्यतेधर्मो, दयादानाद् विवर्धते ।
क्षमया तिष्ठति धर्मः, क्रोधाद्धर्मो विनश्यति ॥४॥

(५) वयमत्तं कदापि न दीव्येम । (६) रामो रावणाय चुक्रोध (अक्रुध्यत्)। (७) मोहनः क्रोधमशाम्यत् (८) त्वं शाम्येः। (९) बालका बाहुभ्यां परस्परं युध्यन्ते (१०) गोविन्दः क्लिश्यते (११) व्याधो मृगंविव्याध (अविध्यत्)। (१२) मृगाः व्याधात् त्रश्यन्ति (१३) सौचिकोऽङ्गरक्षिकाम् असीव्यत् (१४) स हस्तेन वस्त्रं मायते। (१५) मम माता माम पुषत् (१६) पक्षिणो गगने- उड्डीयन्ते ।१७) स त्वयि अमुह्यत्। (१८) अहं त्वां स्निह्यामि (१९) मे मनो दूयते। (२०) ह्रस्वपादापाः जलेन पुष्यन्ति जलरहितेन च शुष्यन्ति (२१) तत्र दीपिकाः दीप्यन्ते (२२) क्षत्रियाः रणे शस्त्रैः युध्यन्ते (२३) पथिकाः पदाती पद्यन्ते ॥

संस्कृत में अनुवाद कीजिए—

(१) लोग श्री रामलक्ष्मण को प्यार करते थे (२) सिपाही मैदान में लड़ते हैं (३) जुआ कभी भी नहीं खेलना चाहिये (४) सब पक्षी बाज से त्रसित होते हैं (५) उसने मेरे ऊपर क्रोध किया (६) वह मुझसे ईर्ष्या करता है (७) क्या दर्जी ने वस्त्र सी दिया ? (८) सब मनुष्य राम पर मोहित हो गये (९) उसके वचन से मेरा मन दुःखी हो गया (१०) विद्यार्थी अपने पाठ को समझें। (११) पूर्व किये हुए सब पाप धर्म से नष्ट हो जाते हैं। (१२) अन्याय से उपार्जित किया हुआ धन नाश हो जाता है। (१३) वहाँ दीपक जलते हैं (१४) पथिक पैदल जाता है (१५) मोहन शान्त हो गया (१६) लड़का कुपुत्र हो जाय परन्तु माता पुत्र के प्रति कुमाता कभी भी नहीं होती है (१७) वह तालाब सूख गया (१८) वह आपकी बातों पर मुग्ध हो गया (१९) मेरी माँ ने मुझे पाला था (२०) सेनाएँ पैदल जाती हैं (२१) शकुन्तला हाथ से साड़ी नापती है।

"क्रुध, द्रुह, ईर्ष्या, असूया" इन धातुओं के योग में चतुर्थी विभक्ति होती है।

———

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्वादशोऽध्यायः

प्रथमः पाठः

अथ स्वादिगण प्रकरणम्

इस गण के धातुओं में प्रत्यय से पूर्व में "नु" चिन्ह जोड़ा जाता है और एकवचन में 'नु' के उकार को ओकार कर देते हैं।

जैसे :—"सु+नु+ति" = सुनोति बन गया।

सु = रसनिकालना या यज्ञान्त स्नान करना

To extract the juice

लट् वर्तमान काल

	परस्मै पद प्रकरणम्			आत्मने पद प्रकरणम्		
	ए०	द्वि०	ब०	ए०	द्वि०	ब०
प्र० पु०	सुनोति	सुनुतः	सुन्वन्ति	सुनुते	सुन्वाते	सुन्वते
म० पु०	सुनोसि	सुनुथः	सुनुथ	सुनुषे	सुन्वाथे	सुनुध्वे
उ० पु०	सुनोमि	सुनुवः	सुनुमः	सुन्वे	सुनुवहे	सुनुमहे

लिट् परोक्ष भूतकाल

प्र० पु०	सुषाव	सुषुवतुः	सुषुवुः	सुषुवे	सुषुवाते	सुषुविरे
म० पु०	सुषविथ	सुषोथ	सुषुवथुः सुषुव	सुषुविषे	सुषुवाथे	सुषुविध्वे
उ० पु०	सुषाव	सुषुविव	सुषुविम	सुषुवे	सुषुविवहे	सुषुविमहे

लुट् अनद्यतन भविष्यत्काल

प्र० पु०	सोता	सोतारौ	सोतारः	सोता	सोतारौ	सोतारः
म० पु०	सोतासि	सोतास्थः	सोतास्थ	सोतासे	सोतासाथे	सोताध्वे
उ० पु०	सोतास्मि	सोतास्वः	सोतास्मः	सोताहे	सोतास्वहे	सोतास्महे

लृट् सामान्य भविष्यत्काल

प्र० पु०	सोष्यति	सोष्यतः	सोष्यन्ति	सोष्यते	सोष्येते	सोष्यन्ते
म० पु०	सोष्यसि	सोष्यथः	सोष्यथ	सोष्यसे	सोष्येथे	सोष्यध्वे
उ० पु०	सोष्यामि	सोष्यावः	सोष्यामः	सोष्ये	सोष्यावहे	सोष्यामहे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

"लोट्" आज्ञावाचक

प्र० पु०	सुनोतु=सुनुतात्,	सुनुताम्	सुन्वन्तु	सुनुताम्	सुन्वाताम्	सुन्वताम्
म० पु०	सुनु=सुनुतात्,	सुनुतम्	सुनुत	सुनुष्व	सुन्वाथाम्	सुनुध्वम्
उ० पु०	सुनवानि	सुनवाव	सुनवाम	सुनवै	सुनवावहै	सुनवामहै

'लङ्' अनद्यतन भूतकाल

प्र० पु०	असुनोत्	असुनुताम्	असुन्वन्	असुनुत	असुन्वाताम्	असुन्वत
म० पु०	असुनोः	असुनुतम्	असुनुत	असुनुथाः	असुन्वाथाम्	असुनुध्वम्
उ० पु०	असुनवम्	असुनुव	असुनुम	असुन्वि	असुनुवहि	असुनुमहि

विधिलिङ्

प्र० पु०	सुनुयात्	सुनुयाताम्	सुनुयुः	सुन्वीत	सुन्वीयाताम्	सुन्वीरन्
म० पु०	सुनुयाः	सुनुयातम्	सुनुयात	सुन्वीथाः	सुन्वीयाथाम्	सुन्वीध्वम्
उ० पु०	सुनुयाम्	सुनुयाव	सुनुयाम	सुन्वीय	सुन्वीवहि	सुन्वीमहि

आशीर्लिङ्

प्र० पु०	सूयात्	सूयास्ताम्	सूयासुः	सोषीष्ट	सोषीयास्ताम्	सोषीरन्
म० पु०	सूयाः	सूयास्तम्	सूयास्त	सोषीष्ठाः	सोषीयास्थाम्	सोषीध्वम्
उ० पु०	सूयासम्	सूयास्व	सूयास्म	सोषीय	सोषीवहि	सोषीमहि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi
CC0. In Public Domain. Digitized by eGangotri

'लुङ्' सामान्य भूतकाल

प्र० पु०	असावीत्	असाविष्टाम्	असाविषुः	असोष्ट	असोषाताम्	असोषत
म० पु०	आसावीः	असाविष्टम्	असाविष्ट	असोष्ठाः	असोषाथाम्	असोढ्वम्
उ० पु०	असाविषम्	असाविष्व	असाविष्म	असोषि	असोष्वहि	असोष्महि

'लृङ्' हेतुहेतुमद् भाव भविष्यत्

प्र० पु०	असोष्यत्	असोष्यताम्	असोष्यन्	असोष्यत	असोष्येताम्	असोष्यन्त
म० पु०	असोष्यः	असोष्यतम्	असोष्यत	असोष्यथाः	असोष्येथाम्	असोष्यध्वम्
उ० पु०	असोष्यम्	असोष्याव	असोष्याम	असोष्ये	असोष्यावहि	असोष्यामहि

चि = चुनना (To collect)

'लट्' वर्तमान काल

प्र० पु०	चिनोति	चिनुतः	चिन्वन्ति	चिनुते	चिन्वाते	चिन्वते
म० पु०	चिनोषि	चिनुथः	चिनुथ	चिनुषे	चिन्वाथे	चिनुध्वे
उ० पु०	चिनोमि	चिनुवः	चिनुमः	चिन्वे	चिनुवहे	चिनुमहे

सामान्य भविष्यत्काल

प्र० पु०	चेष्यति	चेष्यतः	चेष्यन्ति	चेष्यते	चेष्येते	चेष्यन्ते
म० पु०	चेष्यसि	चेष्यथः	चेष्यथ	चेष्यसे	चेष्येथे	चेष्यध्वे
उ० पु०	चेष्यामि	चेष्यावः	चेष्यामः	चेष्ये	चेष्यावहे	चेष्यामहे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

"लोट्" आज्ञावाचक

प्र० पु०	चिनोतु=चिनुतात्	चिनुताम्	चिन्वन्तु	चिनुताम्	चिन्वाताम्	चिन्वताम्
म० पु०	चिनु=चिनुतात्	चिनुतम्	चिनुत	चिनुष्व	चिन्वाथाम्	चिनुध्वम्
उ० पु०	चिनवानि	चिनवाव	चिनवाम	चिनवै	चिन्वावहै	चिन्वामहै

'लङ्' अनद्यतनभूतकाल

प्र० पु०	अचिनोत्	अचिनुताम्	अचिन्वन्	अचिनुत	अचिन्वाताम्	अचिन्वत
म० पु०	अचिनोः	अचिनुतम्	अचिनुत	अचिनुथाः	अचिन्वाथाम्	अचिनुध्वम्
उ० पु०	अचिन्वम्	अचिनुव	अचिनुम्	अचिन्वि	अचिनुवहि	अचिनुमहि

विधिलिङ्

प्र० पु०	चिनुयात्	चिनुयाताम्	चिनुयुः	चिन्वीत्	चिन्वीयाताम्	चिन्वीरन्
म० पु०	चिनुयाः	चिनुयातम्	चिनुयात	चिन्वीथाः	चिन्वीयाथाम्	चिन्वीध्वम्
उ० पु०	चिनुयाम्	चिनुयाव	चिनुयाम	चिन्वीय	चिन्वीवहि	चिन्वीमहि

आशीर्लिङ्

प्र० पु०	चीयात्	चीयास्ताम्	चीयासुः	चेषीष्ट	चेषीयास्ताम्	चेषीरन्
म० पु०	चीयाः	चीयास्तम्	चीयास्त	चेषीष्ठाः	चेषीयास्थाम्	चेषीध्वम्
उ० पु०	चीयासम्	चीयास्व	चीयास्म	चेषीय	चेषीवहि	चेषीमहि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi
CC0. In Public Domain. Digitized by Sarayu Trust/eGangotri

'लुङ्' सामान्यभूतकाल

प्र० पु०	अचैषीत्	अचैष्टाम्	अचैषुः	अचेष्ट	अचेषाताम्	अचेषत
म० पु०	अचैषीः	अचैष्टम्	अचैष्ट	अचेष्ठाः	अचेषाथाम्	अचेध्वम्
उ० पु०	अचैषम्	अचैष्व	अचैष्म	अचेषि	अचेष्वहि	अचेष्महि

'लृङ्' हेतुहतुमद्भावभविष्यत्

प्र० पु०	अचेष्यत्	अचेष्यताम्	अचेष्यन्	अचेष्यत	अचेष्येताम्	अचेष्यन्त
म० पु०	अचेष्यः	अचेष्यतम्	अचेष्यत	अचेष्यथाः	अचेष्येथाम्	अचेष्यध्वम्
उ० पु०	अचेष्यम्	अचेष्याव	अचेष्याम	अचेष्ये	अचेष्यावहि	अचेष्यामहि

निम्नलिखित धातुओं के प्रथम पुरुष में एक वचन के रूप है

	लट्	लृट्	लोट्	विधि	आशीः	लङ्	लुङ	हेतु
सक्=समर्थ होना To be able	शक्नोति	शक्ष्यति	शक्नोतु	शक्नुयात्	शक्यात्	अशक्नोत	अशकत्	अशक्ष्यत्
आप्=प्राप्त करना To obtain	आप्नोति	आप्स्यति	आप्नोतु	आप्नुयात्	आप्यात्	आप्नोत्	आपत्	आप्स्यत्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi
CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्वितीयः पाठः

स्वादिगण के उदाहरण

(१) स इक्षुरसमसुनोत्=उसने ईख का रस निकाला।
He extracted the juice of the suger-canes.

(२) यूयं जम्बीररसं सुनुयात=तुम्हें नींबू का रस निकालना चाहिये।
You should extract the juice of the lemon.

(३) यूयं गोधूमान् चिनुयात=तुम्हें गेहूँ एकट्ठा करना चाहिये।
You must collect the wheat.

(४) स गोधूमानचिनोत्=उसने गेहूँ एकट्ठा किया।
He collected the wheat.

(५) किं त्वमिदं कार्यं कर्तुं शक्नोसि? क्या तू इस कार्य को कर सकता है?
Con you do this work?

(६) युष्माकं मनः कथं न दुष्यति? तुम्हारा मन क्यों नहीं दुःखी होगा?
Why will you not feel sorry?

अभ्यास

हिन्दी में अनुवाद कीजिएः—

धर्मः सर्वं सुखाकरो हितकरो धर्मं बुधाश्चिन्वते,
सुवर्णं पुष्पितां पृथिवीं विचिन्वन्ति नरास्त्रयः
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्।
सोमं सुनोति यज्ञेषु, सोमवंश विभूषणः।
पुरः सुवति संग्रामे, स्यन्दनं स्वयमेव सः।
ते प्राप्नुवन्ति मामेव, सर्वभूत हिते रताः॥
न च शक्नोमि अवस्थातुम्। हतो वा प्राप्स्यसि स्वर्गम्।
अधर्माभि भवात्कृष्ण, प्रदुष्यन्ति कुलस्त्रियः।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः।
न दुनोति दयालुत्वाद, वचसा कञ्चिदप्यसौ।
दुरुक्तैरपि दीनानां, मनस्तस्य न दूयते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धुनोति चम्पक वनानि, धुनोत्यशोकम् ॥
चूतं धुनाति धुवति, स्फुटिताऽतिमुक्तम् ॥

संस्कृत में अनुवाद कीजिए :—

(१) याज्ञिक लोग यज्ञों में सोम रस निकालते हैं। (२) सुरेश नारंगी का रस निकालता है। (३) क्या मैं जा सकती हूँ ? (४) गोविन्द ने अपना स्थान पुनः प्राप्त किया। (५) बन्दर वृक्ष की शाखा को हिलाता है। (६) उसने मुझे हिला दिया। (७) क्या तुम इस काम को कर सकते हो। (८) हाँ, मैं इस कामको कर सकता हूँ। (९) वह उस वस्तु को प्राप्तकर लेगा। (१०) हम लोग चावलों में से कंकड़ चुनते हैं। (११) वायु वृक्षों को हिला देती है। (१२) उसका मन क्यों नहीं दुःखी होता है ?

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्रयोदशोऽध्यायः

प्रथमः पाठः

अथतुदादिगण प्रकरणम्

द्रष्टव्यः—तुदादिगण में प्रत्यय से पूर्व और धातु के अन्त में "अ" चिन्ह लगाया जाता है।

परन्तु भ्वादिगण और तुदादिगण में इतना भेद है, कि भ्वादिगण में प्रत्यय लगाने पर धातु के—इ, उ, ऋ, स्वर को गुण कर देते हैं, परञ्च—तुदादिगण में गुण नहीं होता है। जैसे :—

भ्वादिगण प्रकरणम्	तुदादिगण प्रकरणम्
बुध्=बोधति Knows	तुद=तुदति Worries
जि=जयति Conquers	विश=विशति Enters
नी=नयति Carries	क्षिप्=क्षिपति Throws
सृ=सरति Goes	सृज=सृजति Creates
कृष्=कर्षति pulles	कृ=कृषति ploughes

तुद् = पीड़ा देना To Tease

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

'लट्' वर्तमानकाल

	परस्मैपदप्रकरणम्			आत्मनेपदप्रकरणम्		
	ए०	द्वि०	ब०	ए०	द्वि०	ब०
प्र० पु०	तुदति	तुदतः	तुदन्ति	तुदते	तुदेते	तुदन्ते
म० पु०	तुदसि	तुदथः	तुदथ	तुदसे	तुदेथे	तुदध्वे
उ० पु०	तुदामि	तुदावः	तुदामः	तुदे	तुदावहे	तुदामहे

"लिट्" परोक्षभूतकाल

प्र० पु०	तुतोद	तुतुदतुः	तुतुदुः	तुतुदे	तुतुदाते	तुतुदिरे
म० पु०	तुतोदिथ	तुतुदथुः	तुतुद	तुतुदिषे	तुतुदाथे	तुतुदिध्वे
उ० पु०	तुतोद	तुतुदिव	तुतुदिम	तुतुदे	तुतुदिवहे	तुतुदिमहे

"लुट्" अनद्यतनभविष्यत्काल

प्र० पु०	तोत्ता	तोत्तारौ	तोत्तारः	तोत्ता	तोत्तारौ	तोत्तारः
म० पु०	तोत्तासि	तोत्तास्थः	तोत्तास्थ	तोत्तासे	तोत्तासाथे	तोत्ताध्वे
उ० पु०	तोत्तास्मि	तोत्तास्वः	तोत्तास्मः	तोत्ताहे	तोत्तास्वहे	तोत्तास्महे

'लृट्' सामान्य भविष्यत्काल

प्र० पु०	तोत्स्यति	तोत्स्यतः	तोत्स्यन्ति	तोत्स्यते	तोत्स्येते	तोत्स्यन्ते
म० पु०	तोत्स्यसि	तोत्स्यथः	तोत्स्यथ	तोत्स्यसे	तोत्स्येथे	तोत्स्यध्वे
उ० पु०	तोत्स्यामि	तोत्स्यावः	तोत्स्यामः	तोत्स्ये	तोत्स्यावहे	तोत्स्यामहे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

"लोट्" आज्ञावाचक

प्र० पु०	तुदतु=तुदतात्,	तुदताम्	तुदन्तु	तुदताम्	तुदेताम्	तुदन्ताम्
म० पु०	तुद=तुदतात्,	तुदतम्	तुदत	तुदस्व	तुदेथाम्	तुदध्वम्
उ० पु०	तुदानि	तुदाव	तुदाम	तुदै	तुदावहै	तुदामहै

"लङ्" अनद्यतनभूतकाल

प्र० पु०	अतुदत	अतुदताम्	अतुदन्	अतुदत	अतुदेताम्	अतुदन्त
म० पु०	अतुदः	अतुदतम्	अतुदत	अतुदथाः	अतुदेथाम्	अतुदध्वम्
उ० पु०	अतुदम्	अतुदाव	अतुदाम	अतुदे	अतुदावहि	अतुदामहि

विधिलिङ्

प्र० पु०	तुदेत्	तुदेताम्	तुदेयुः	तुदेत	तुदेयाताम्	तुदेरन्
म० पु०	तुदेः	तुदेतम्	तुदेत	तुदेथाः	तुदेयाथाम्	तुदेध्वम्
उ० पु०	तुदेयम्	तुदेव	तुदेम	तुदेय	तुदेवहि	तुदेमहि

आशीर्लिङ्

प्र० पु०	तुद्यात्	तुद्यास्ताम्	तुद्यासुः	तुत्सीष्ट	तुत्सीयास्ताम्	तुत्सीरन्
म० पु०	तुद्याः	तुद्यास्तम्	तुद्यास्त	तुत्सीष्ठाः	तुत्सीयास्थाम्	तुत्सीध्वम्
उ० पु०	तुद्यासम्	तुद्यास्व	तुद्यास्म	तुत्सीय	तुत्सीवहि	तुत्सीमहि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

"लुङ्" सामान्यभूतकाल

प्र० पु०	अतौत्सीत्	अतौत्ताम्	अतौत्सुः	अतुत्त	अतुत्साताम्	अतुत्सत
म० पु०	अतौत्सीः	अतौत्तम्	अतौत्त	अतुत्थाः	अतुत्साथाम्	अतुद्ध्वम्
उ० पु०	अतौत्सम्	अतौत्स्व	अतौत्स्म	अतुत्सि	अतुत्स्वहि	अतुत्स्महि

हेतुहेतुमद्भावभविष्यत्

प्र० पु०	अतोत्स्यत्	अतोत्स्याताम्	अतोत्स्यन्	अतोत्स्यत	अतोत्स्येताम्	अतोत्स्यन्त
म० पु०	अतोत्स्यः	अतोत्स्यतम्	अतोत्स्यत	अतोत्स्यथाः	अतोत्स्येथाम्	अतोत्स्यध्वम्
उ० पु०	अतोत्स्यम्	अतोत्स्याम	अतोत्स्याम	अतोत्स्ये	अतोत्स्यावहि	अतोत्स्यामहि

मृङ् = मरना To die

द्रष्टव्य—"मृङ्" धातु से "लट् लोट् लङ् विधिलिङ्, आशीर्लिङ् और लुङ्" लकारो में आत्मने पद के रूप बनते हैं और "लिट्, लुट, लृट्, लृङ्" इन लकारों में परस्मैपद के रूप बनते है।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'लट्' वर्तमानकाल

प्र० पु०	म्रियते	म्रियेते	म्रियन्ते
म० पु०	म्रियसे	म्रियेथे	म्रियध्वे
उ० पु०	म्रिये	म्रियावहे	म्रियामहे

'लृट्' सामान्य भविष्यत्काल

प्र० पु०	मरिष्यति	मरिष्यतः	मरिष्यन्ति
म० पु०	मरिष्यसि	मरिष्यथः	मरिष्यथ
उ० पु०	मरिष्यामि	मरिष्यावः	मरिष्यामः

"लोट्" आज्ञावाचक

प्र० पु०	म्रियताम्	म्रियेताम्	म्रियन्ताम्
म० पु०	म्रियस्व	म्रियेथाम्	म्रियध्वम्
उ० पु०	म्रियै	म्रियावहै	म्रियामहै

"लङ्" अनद्यतनभूत

प्र० पु०	अम्रियत	अम्रियेताम्	अम्रियन्त
म० पु०	अम्रियथाः	अम्रियेथाम्	अम्रियध्वम्
उ० पु०	अम्रिये	अम्रियावहि	अम्रियामहि

विधिलिङ्

प्र० पु०	म्रियेत	म्रियेयाताम्	म्रियेरन्
म० पु०	म्रियेथाः	म्रियेयाथाम्	म्रियेध्वम्
उ० पु०	म्रियेय	म्रियेवहि	म्रियेमहि

आशीर्लिङ्

प्र० पु०	मृषीष्ट	मृषीयास्ताम्	मृषीरन्
म० पु०	मृषीष्ठाः	मृषीयास्थाम्	मृषीध्वम्
उ० पु०	मृषीय	मृषीवहि	मृषीमहि

"लुङ्" सामान्य भूतकाल

प्र० पु०	अमृत	अमृषाताम्	अमृषत
म० पु०	अमृथाः	अमृषाथाम्	अमृढ्वम्
उ० पु०	अमृषि	अमृष्वहि	अमृष्महि

हेतुहेतुमद्भावभविष्यत्

प्र० पु०	अमरिष्यत्	अमरिष्यताम्	अमरिष्यन्
म० पु०	अमरिष्यः	अमरिष्यतम्	अमरिष्यत
उ० पु०	अमरिष्यम्	अमरिष्याव	अमरिष्याम

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्रष्टव्य— सात लकारों के कोष्ट में कुछ धातुओं के प्रथम पुरुष के एक वचन में रूप निम्नलिखित हैं।

द्वितीयः पाठः

संस्कृत	हिन्दी	इंगलिश	लट्	लुट्
लिख्	=लिखना	To write	लिखति	लेखिष्यति
स्पृश्	=छूना	To touch	स्पृशति	स्प्रक्ष्यति=स्पर्ष्यति
प्रच्छ्	=पूछना	To ask	पृच्छति	प्रक्ष्यति
इष्	=इच्छा करना	To desire	इच्छति	एषिष्यति
विश्	=प्रवेश करना	To enter	विशति	वेक्ष्यति
कुट्	=कुटिलता करना	To evade	कुटति	कुटिष्यति
कृत्(कृन्त)	=काटना	Tobite	कृन्तति	कर्तिष्यति=कर्त्स्यति
व्रश्च्(वृश्च)	=डंक मारना	To sting	वृश्चति	व्रश्चिष्यति=व्रक्ष्यति
व्यच्(विच्)	=छलना,ठगना	To swindle	विचति	व्यचिष्यति
सृज्	=उत्पन्न करना	To create	सृजति	स्रक्ष्यति
मुच्(मुञ्च)	=छोड़ना	To leave	मुञ्चति	मोक्ष्यति
मुच्(मुञ्च)	=छोड़ना	To relinquish	मुञ्चते	मोक्ष्यते
विद्(विन्न)	=प्राप्त करना	To get	विन्दति	वेत्स्यति
विद्(विन्द)	=प्राप्त करना	To get	विन्दते	वेत्स्यते
क्षिप्	=फेंकना	To throw	क्षिपति	क्षेप्स्यति
क्षिप्	=फेंकना	To throw	क्षिपते	क्षेप्स्यते

तृतीयः पाठः

तुदादि गण के उदाहरण

१—किं तव चरणे कण्टकोऽतुदत्=क्या तेरे पैर में काँटा चुभ गया? Did thorn pierce thy foot?

२—मम कटिप्रदेशे तुदति=मेरे कमर में दर्द होता है। There is pain in my waist.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लोट्	विधिलिङ्	लङ्	लुङ्	हेतुहेतुमद्भाव
लिखतु	लिखेत्	अलिखत्	अलेखीत्	अलेखिष्यत्
स्पृशतु	स्पृशेत्	अस्पृशत्	अस्प्राक्षीत्=अस्पार्क्षीत्	अस्प्रक्ष्यत्=अस्पर्क्ष्यत्
पृच्छतु	पृच्छेत्	अपृच्छत्	अप्राक्षीत्	अप्रक्ष्यत्
इच्छतु	इच्छेत्	ऐच्छत	ऐषीत्	ऐषिष्यत्
विशतु	विशेत्	अविशत्	अविक्षत्	अवेक्ष्यत्
कुटतु	कुटेत्	अकुटत्	अकुटीत्	अकुटिष्यत्
कृन्ततु	कृन्तेत्	अकृन्तत्	अकर्तीत्	अकर्तिष्यत्=अकर्त्स्यत्
वृश्चतु	वृश्चेत्	अवृश्चत्	अव्राक्षीत्=अव्राक्षीत्	अव्रश्चिष्यत्=अव्रक्ष्यत्
विचतु	विचेत्	अविचत्	अव्याचीत्=अव्यचीत्	अव्यचिष्यत्
सृजतु	सृजेत्	असृजत्	असाक्षीत्	असक्ष्यत्
मुञ्चतु	मुञ्चेत्	अमुञ्चत्	अमुचत्	अमोक्ष्यत
मुञ्चताम्	मुञ्चेत	अमुञ्चत्	अमुक्त	अमोक्ष्यत
विन्दतु	विन्देत्	अविन्दत्	अविदत्	अवेत्स्यत्
विन्दताम्	विन्देत	अविन्दत	अवेदिष्ट=अवित्त	अवेत्स्यत
क्षिपतु	क्षिपेत्	अक्षिपत्	अक्षैप्सीत्	अक्षेप्स्यत्
क्षिपताम्	क्षिपेत	अक्षिपत	अक्षिप्त	अक्षेप्स्यत

३—सूचिका मां तोत्स्यति=सुई मुझे चुभ जायेगी। The neadle will pinch me.

४—श्री कृष्णोऽर्जुनमुपादिशत्=भगवान् ने अर्जुन को उपदेश दिया। Sri Krisna advised Arjun.

५—गुरुः मामिदंवचनमुपादिशत्=गुरु ने मुझे इस वचन का उपदेश दिया। The preceptor advised me this voice.

६—त्वं न कुटेः=तुझे कुटिलता नहीं करनी चाहिये। Thou must not evade.

सु माम् अविचत्=उसने मुझे ठग लिया। He swindled me.

Ganesh Várni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अभ्यास

हिन्दी में अनुवाद कीजिये—

(१) उपदेक्ष्यन्ति ते ज्ञानं, ज्ञानिनः तत्त्व दर्शिनः (२) नहिं सुप्तस्य सिंहस्य, प्रविशन्ति मुखे मृगाः। (३) भ्रज्जकः भ्राष्टे चणकान् भृज्जति। (४) वृश्चिको मामवृश्चत् (५) मम अक्षि स्फुरति (६) छात्राः क्रीडाक्षेत्रे कन्दूकमुत्क्षिपन्ति (७) सज्जनाः परस्परं विमृशन्ति (८) मालाकारो ग्रीष्मऋतौ ह्रस्वपादपान् जलेन सिञ्चति (९) मूषकाः वस्त्राणि अकृन्तन् (१०) शिशुः शीतेन सीदति (११) सा गोधूमान् पिंशति (१२) स माममिलत् (१३ सा त्वयिप्रसीदति।

संस्कृत में अनुवाद कीजिए—

(१) आज तुमने अनुवाद क्यों नहीं लिखा ? (२) पिता जी ने मुझे उपदेश दिया, परन्तु मैंने एक न माना (३) मेरी दाहिनी आँख फड़कती है (४) दुष्ट मेरे घर में कभी न घुसने पावे। (५) वह मेरे ऊपर प्रसन्न होता है (६) तुमको अपनी माँ से पूछना चाहिये (७) दर्जी कैंची से कपड़ों को काटता है (८) वह फड़फड़ाया (९) लड़के चाकू से कलम काटते हैं (१०) किसी के ऊपर कङ्कड़ी मत फेंको (११) कूड़ा करकट घूरे पर फेंक दो (१२) मेरा हाथ छुओ (१३) बच्चा शरदी से दुःखी होता है (१४) भड़भुजे भट्ठी में चनों को भूनते हैं (१५) आपस में परामर्श कर लेना चाहिये (१६) फर्श पर पानी छिड़क दो (१७) वह आटा पीसती है (१८) बिच्छू डंक मार देगा (१९) साँप ने डश लिया।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

चतुर्दशोऽध्यायः

प्रथमः पाठः

अथ रुधादि गण प्रकरणम्

नियम—इस गण में प्रत्यय से पूर्व धातु के स्वर के अन्त में "न" चिह्न लगाया जाता है, और "र, ष" से परे "न" को "ण" हो जाता है। जैसे—"रु, न, ध्, ति" यहाँ पर रकार से परे नकार है, अतः "न" को "ण" कर देने से "रुणद्धि" प्रयोग बना। इसी प्रकार सर्वत्र जान लेना चाहिये।

रुध्=रोकना To impede

'लट्' वर्तमान काल

	ए०	द्वि०	ब०	ए०	द्वि०	ब०
प्र० पु०	रुणद्धि	रुन्धः	रुन्धन्ति	रुन्धे	रुन्धाते	रुन्धते
म० पु०	रुणत्सि	रुन्धः	रुन्ध	रुन्त्से	रुन्धाथे	रुन्ध्वे
उ० पु०	रुणद्धि	रुन्ध्वः	रुन्ध्मः	रुन्धे	रुन्ध्वहे	रुन्ध्महे

'लृट्' सामान्य भविष्यत्काल

प्र० पु०	रोत्स्यति	रोत्स्यतः	रोत्स्यन्ति	रोत्स्यते	रोत्स्येते	रोत्स्यन्ते
म० पु०	रोत्स्यसि	रोत्स्यथः	रोत्स्यथ	रोत्स्यसे	रोत्स्येथे	रोत्स्यध्वे
उ० पु०	रोत्स्यामि	रोत्स्यावः	रोत्स्यामः	रोत्स्ये	रोत्स्यावहे	रोत्स्यामहे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'लोट्' आज्ञावाचक

प्र० पु०	रुणद्धु = रुन्धात्	रुन्धाम्	रुन्धन्तु	रुन्धाम्	रुन्धाताम्	रुन्धताम्
म० पु०	रुन्धि = रुन्धात्	रुन्धम्	रुन्ध	रुन्त्स्व	रुन्धाथाम्	रुन्ध्वम्
उ० पु०	रुणधानि	रुणधाव	रुणधाम	रुणधै	रुणधावहै	रुणधामहै

'लङ्' अनद्यतनभूतकाल

प्र० पु०	अरुणत्	अरुन्धाम्	अरुन्धन्	अरुन्ध	अरुन्धाताम्	अरुन्धत
म० पु०	अरुणः = अरुणात्	अरुन्धम्	अरुन्ध	अरुन्धाः	अरुन्धाथाम्	अरुन्द्ध्वम्
उ० पु०	अरुणधम्	अरुन्ध्व	अरुन्ध्म	अरुन्धि	अरुन्ध्वहि	अरुन्धमहि

विधिलिङ्

प्र० पु०	रुन्ध्यात्	रुन्ध्याताम	रुन्ध्युः	रुन्धीत	रुन्धीयाताम्	रुन्धीरन्
म० पु०	रुन्ध्याः	रुन्ध्यातम्	रुन्ध्यात	रुन्धीथाः	रुन्धीयाथाम्	रुन्धीध्वम्
उ० पु०	रुन्ध्याम्	रुन्ध्याव	रुन्ध्याम	रुन्धीय	रुन्धीवहि	रुन्धीमहि

आशीर्लिङ्

प्र० पु०	रुध्यात्	रुध्यास्ताम्	रुध्यासुः	रुत्सीष्ट	रुत्सीयास्ताम्	रुत्सीरन्
म० पु०	रुध्याः	रुध्यास्तम्	रुध्यास्त	रुत्सीष्टाः	रुत्सीयास्थाम्	रुत्सीध्वम्
उ० पु०	रुध्यासम्	रुध्यास्व	रुध्यास्म	रुत्सीय	रुत्सीवहि	रुत्सीमहि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi
CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लुङ् सामान्य भूतकाल

प्र० पु०	अरौत्सीत्	अरौद्धाम्	अरौत्सुः	अरुद्ध	अरुत्साताम्	अरुत्सत
म० पु०	अरौत्सीः	अरौद्धम्	अरौद्ध	अरुद्धाः	अरुत्साथाम्	अरुद्ध्वम्
उ० पु०	अरौत्सम्	अरौत्स्व	अरौत्स्म	अरुत्सि	अरुत्स्वहि	अरुत्स्महि

परस्मैपद में एक प्रकार का रूप और भी बनता है।

प्र० पु०	अरुधत्	अरुधताम्	अरुधन्
म० पु०	अरुधः	अरुधतम्	अरुधत
उ० पु०	अरुधम्	अरुधाव	अरुधाम

'लृङ्' हेतुहेतुमद्भावभविष्यत्

प्र० पु०	अरोत्स्यत्	अरोत्स्यताम्	अरोत्स्यन्	अरोत्स्यत	अरोत्स्येताम्	अरोत्स्यन्त
म० पु०	अरोत्स्यः	अरोत्स्यतम्	अरोत्स्यत	अरोत्स्यथाः	अरोत्स्येथाम्	अरोत्स्यध्वम
उ० पु०	अरोत्स्यम्	अरोत्स्याव	अरोत्स्याम	अरोत्स्ये	अरोत्स्यावहि	अरोत्स्यामहि

भिद् = फाड़ना To rend, to separate

'लट्' वर्तमान काल

प्र० पु०	भिनत्ति	भिन्तः	भिन्दन्ति	भिन्ते	भिन्दाते	भिन्दते
म० पु०	भिनत्सि	भिन्थः	भिन्थ	भिन्त्से	भिन्दाथे	भिन्ध्वे
उ० पु०	भिनद्मि	भिन्द्वः	भिन्द्मः	भिन्दे	भिन्द्वहे	भिन्द्महे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'लृट्' सामान्य भविष्यत्काल

प्र० पु०	भेत्स्यति	भेत्स्यतः	भेत्स्यन्ति		भेत्स्यते	भेत्स्येते	भेत्स्यन्ते
म० पु०	भेत्स्यसि	भेत्स्यथः	भेत्स्यथ		भेत्स्यसे	भेत्स्येथे	भेत्स्यध्वे
उ० पु०	भेत्स्यामि	भेत्स्यावः	भेत्स्यामः		भेत्स्ये	भेत्स्यावहे	भेत्स्यामहे

"लोट्" आज्ञा वाचक

प्र० पु०	भिनत्तु = भिन्तात्	भिन्ताम्	भिन्दन्तु		भिन्ताम्	भिन्दाताम्	भिन्दताम्
म० पु०	भिन्धि = भिन्तात्,	भिन्तम्	भिन्त		भिन्त्स्व	भिन्दाथाम्	भिन्ध्वम्
उ० पु०	भिनदानि	भिनदाव	भिनदाम		भिनदै	भिनदावहै	भिनदामहै

"लङ्" अनद्यतन भूतकाल

प्र० पु०	अभिनत् = अभिनद्	अभिन्ताम्	अभिन्दन्		अभिन्त	अभिन्दाताम्	अभिन्दत
म० पु०	अभिनः = अभिनत्	अभिन्तम्	अभिन्त		अभिन्थाः	अभिन्दाथाम्	अभिन्ध्वम्
उ० पु०	अभिन्दम्	अभिन्द्व	अभिन्द्म		अभिन्दि	अभिन्द्वहि	अभिन्द्महि

विधिलिङ्

प्र० पु०	भिन्द्यात्	भिन्द्याताम्	भिन्द्युः		भिन्दीत	भिन्दीयाताम्	भिन्दीरन्
म० पु०	भिन्द्याः	भिन्द्यातम्	भिन्द्यात		भिन्दीथाः	भिन्दीयाथाम्	भिन्दीध्वम्
उ० पु०	भिन्द्याम्	भिन्द्याव	भिन्द्याम		भिन्दीय	भिन्दीवहि	भिन्दीमहि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आशीर्लिङ्

प्र० पु०	भिद्यात्	भिद्यास्ताम्	भिद्यासुः	भित्सीष्ट	भित्सीयास्ताम्	भित्सीरन्
म० पु०	भिद्याः	भिद्यास्तम्	भिद्यास्त	भित्सीष्ठाः	भित्सीयास्थाम्	भित्सीध्वम्
उ० पु०	भिद्यासम्	भिद्यास्व	भिद्यास्म	भित्सीय	भित्सीवहि	भित्सीमहि

लुङ् सामान्यभूतकाल (परस्मैपदी दूसरा रूप)

प्र० पु०	अभिदत्	अभिदताम्	अभिदन्
म० पु०	अभिदः	अभिदतम्	अभिदत
उ० पु०	अभिदम्	अभिदाव	अभिदाम

"लुङ्" सामान्यभूतकाल

प्र० पु०	अभैत्सीत्	अभैत्ताम्	अभैत्सुः	अभित्त	अभित्साताम्	अभित्सत
म० पु०	अभैत्सीः	अभैत्तम्	अभैत्त	अभित्थाः	अभित्साथाम्	अभिद्ध्वम्
उ० पु०	अभैत्सम्	अभैत्स्व	अभैत्स्म	अभित्सि	अभित्स्वहि	अभित्स्महि

"लृङ्" हेतुहेतुमद्भविष्यत्

प्र० पु०	अभेत्स्यत्	अभेत्स्यताम्	अभेत्स्यन्	अभेत्स्यत	अभेत्स्येताम्	अभेत्स्यन्त
म० पु०	अभेत्स्यः	अभेत्स्यतम्	अभेत्स्यत	अभेत्स्यथाः	अभेत्स्येथाम्	अभेत्स्यध्वम्
उ० पु०	अभेत्स्यम्	अभेत्स्याव	अभेत्स्याम	अभेत्स्ये	अभेत्स्यावहि	अभेत्स्यामहि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi
CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

छिद् = काटना To cut

"लट्" वर्तमानकाल

प्र० पु०	छिनत्ति	छिन्तः	छिन्दन्ति	छिन्ते	छिन्दाते	छिन्दते
म० पु०	छिनत्सि	छिन्थः	छिन्थ	छिन्त्से	छिन्दाथे	छिन्द्ध्वे
उ० पु०	छिन्द्मि	छिन्द्वः	छिन्द्मः	छिन्दे	छिन्द्वहे	छिन्द्महे

"लृट्" सामान्यभविष्यत्काल

प्र० पु०	छेत्स्यति	छेत्स्यतः	छेत्स्यन्ति	छेत्स्यते	छेत्स्येते	छेत्स्यन्ते
म० पु०	छेत्स्यसि	छेत्स्यथः	छेत्स्यथ	छेत्स्यसे	छेत्स्येथे	छेत्स्यध्वे
उ० पु०	छेत्स्यामि	छेत्स्यावः	छेत्स्यामः	छेत्स्ये	छेत्स्यावहे	छेत्स्यामहे

"लोट्" आज्ञा वाचक

प्र० पु०	छिनत्तु = छिन्तात्,	छिन्ताम्	छिन्दन्तु	छिन्ताम्	छिन्दाताम्	छिन्दताम्
म० पु०	छिन्धि = छिन्तात्,	छिन्तम्	छिन्त	छिन्त्स्व	छिन्दाथाम	छिन्ध्वम्
उ० पु०	छिनदानि	छिनदाव	छिनदाम	छिनदै	छिनदावहै	छिनदामहै

"लङ्" अनद्यतन भूतकाल

प्र० पु०	अछिनत् = अछिनद्	अछिन्ताम्	अछिन्दन्	अछिन्त	अछिन्दाताम्	अछिन्दत
म० पु०	अछिनः = अछिनत्	अछिन्तम्	अछिन्त	अछिन्थाः	अछिन्दाथाम्	अछिन्ध्वम्
उ० पु०	अछिनद्म्	अछिनद्व	अछिन्द्म	अछिन्दि	अछिन्द्वहि	अछिन्द्महि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi
CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विधि लिङ्

प्र० पु०	छिन्द्यात्	छिन्द्याताम्	छिन्द्युः	छिन्दीत	छिन्दीयाताम्	छिन्दीरन्
म० पु०	छिन्द्याः	छिन्द्यातम्	छिन्द्यात	छिन्दीथाः	छिन्दीयाथाम्	छिन्दीध्वम्
उ० पु०	छिन्द्याम्	छिन्द्याव	छिन्द्याम	छिन्दीय	छिन्दीवहि	छिन्दीमहि

आशीर्लिङ्

प्र० पु०	छिद्यात्	छिद्यास्ताम्	छिद्यासुः	छित्सीष्ट	छित्सीयास्ताम्	छित्सीरन्
म० पु०	छिद्याः	छिद्यास्तम्	छिद्यास्त	छित्सीष्ठाः	छित्सीयास्थाम्	छित्सीध्वम्
उ० पु०	छिद्यासम्	छिद्यास्व	छिद्यास्म	छित्सीय	छित्सीवहि	छित्सीमहि

"लुङ्" सामान्य भूतकाल

प्र० पु०	अछैत्सीत्	अछैत्ताम्	अछैत्सुः	अछित्त	अछित्साताम्	अछित्सत
म० पु०	अछैत्सीः	अछैत्तम्	अछैत्त	अछित्थाः	अछित्साथाम्	अछिद्ध्वम्
उ० पु०	अछैत्सम्	अछैत्स्व	अछैत्स्म	अछित्सि	अछित्स्वहि	अछित्स्महि

सामान्य भूतकाल (परस्मैदी दूसरा रूप)

प्र० पु०	अछिदत्	अछिदताम्	अछिदन्
म० पु०	अछिदः	अछिदतम्	अछिदत
उ० पु०	अछिदम्	अछिदाव	अछिदाम

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

"लृङ्" हेतु हेतु मद्भाव भविष्यत्

प्र० पु०	अछेत्स्यत्	अछेत्स्यताम्	अछेत्स्यन्	अछेत्स्यत	अछेत्स्येताम्	अछेत्स्यन्त
म० पु०	अछेत्स्यः	अछेत्स्यतम्	अछेत्स्यत	अछेत्स्यथाः	अछेत्स्येथाम्	अछेत्स्यध्वम्
उ० पु०	अछेत्स्यम्	अछेत्स्याव	अछेत्स्याम	अछेत्स्ये	अछेत्स्यावहि	अछेत्स्यामहि

द्वितीयः पाठ

युज्=मिलाना, जोड़ना To join to add

"लट्" वर्तमान काल

प्र० पु०	युनक्ति	युङ्क्तः	युञ्जन्ति	युङ्क्ते	युञ्जाते	युञ्जते
म० पु०	युनक्षि	युङ्क्थः	युङ्क्थ	युङ्क्षे	युञ्जाथे	युङ्ध्वे
उ० पु०	युनज्मि	युञ्ज्वः	युञ्ज्मः	युञ्जे	युञ्ज्वहे	युञ्ज्महे

'लृट्' सामान्य भविष्यत्काल

प्र० पु०	योक्ष्यति	योक्ष्यतः	योक्ष्यन्ति	योक्ष्यते	योक्ष्येते	योक्ष्यन्ते
म० पु०	योक्ष्यसि	योक्ष्यथः	योक्ष्यथ	योक्ष्यसे	योक्ष्येथे	योक्ष्यध्वे
उ० पु०	योक्ष्यामि	योक्ष्यावः	योक्ष्यामः	योक्ष्ये	योक्ष्यावहे	योक्ष्यामहे

"लोट्" आज्ञावाचक

प्र० पु०	युनक्तु=युङ्क्तात्	युङ्क्ताम्	युञ्जन्तु	युङ्क्ताम्	युञ्जाताम्	युञ्जताम्
म० पु०	युङ्ग्धि=युङ्क्तात्,	युङ्क्तम्	युङ्क्त	युङ्ध्व=युञ्ज्स्व	युञ्जाथाम्	युङ्ध्वम्
उ० पु०	युनजानि	युनजाव	युनजाम	युनजै	युनजावहै	युनजामहै

Ganesh Varni Digambar Jain Institute, Naria, Varanasi
CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

"लङ्" अनद्यतन भूतकाल

प्र० पु०	अयुनक्=अयुनग्	अयुङ्क्ताम्	अयुञ्जन्	अयुङ्क्त	अयुञ्जाताम्	अयुञ्जत
म० पु०	अयुनः=अयुनक्,	अयुङ्क्तम्	अयुङ्क्त	अयुङ्क्थाः	अयुञ्जाथाम्	अयुङ्ग्ध्वम्
उ० पु०	अयुनजम्	अयुञ्ज्व	अयुञ्ज्म	अयुञ्जि	अयुञ्ज्वहि	अयुञ्ज्महि

विधिलिङ्

प्र० पु०	युञ्ज्यात्	युञ्ज्याताम्	युञ्ज्युः	युञ्जीत	युञ्जीयाताम्	युञ्जीरन्
म० पु०	युञ्ज्याः	युञ्ज्यातम्	युञ्ज्यात	युञ्जीथाः	युञ्जीयाथाम्	युञ्जीध्वम्
उ० पु०	युञ्ज्याम्	युञ्ज्याव	युञ्ज्याम	युञ्जीय	युञ्जीवहि	युञ्जीमहि

आशीर्लिङ्

प्र० पु०	युज्यात्	युज्यास्ताम्	युज्यासुः	युक्षीत	युक्षीयास्ताम्	युक्षीरन्
म० पु०	युज्याः	युज्यास्तम्	युज्यास्त	युक्षीथाः	युक्षीयास्थाम्	युक्षीध्वम्
उ० पु०	युज्यास	युज्यास्व	युज्यास्म	युक्षीय	युक्षीवहि	युक्षीमहि

"लुङ्" सामान्य भूतकाल

प्र० पु०	अयौक्षीत्	अयौक्ताम्	अयौक्षुः	अयुक्त	अयुक्षाताम्	अयुक्षत
म० पु०	अयौक्षीः	अयौक्तम्	अयौक्त	अयुक्थाः	अयुक्षाथाम्	अयुग्ध्वम्
उ० पु०	अयौक्षम्	अयौक्ष्व	अयौक्ष्म	अयुक्षि	अयुक्ष्वहि	अयुक्ष्महि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सामान्य भूतकाल (परस्मैपदी दूसरा रूप)

प्र० पु०	अयुजत्	अयुजताम्	अयुजन्
म० पु०	अयुजः	अयुजतम्	अयुजत
उ० पु०	अयुजम्	अयुजाव	अयुजाम

हेतुहेतु मद्भाव भविष्यत

प्र० पु०	अयोक्ष्यत्	अयोक्ष्यताम्	अयोक्ष्यन्	अयोक्ष्यत	अयोक्ष्येताम्	अयोक्ष्यन्त
म० पु०	अयोक्ष्यः	अयोक्ष्यतम्	अयोक्ष्यत	अयोक्ष्यथाः	अयोक्ष्येथाम्	अयोक्ष्यध्वम्
उ० पु०	अयोक्ष्यम्	अयोक्ष्याव	अयोक्ष्याम	अयोक्ष्ये	अयोक्ष्यावहि	अयोक्ष्यामहि

———

Ganesh Varni Digambar Jain Institute, Naria, Varanasi
CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हिंस् = मारना To Kill केवल परस्मैपदी है

लट् वर्तमानकाल

प्र० पु०	हिनस्ति	हिंस्तः	हिंसन्ति
म० पु०	हिनस्सि	हिंस्थः	हिंस्थ
उ० पु०	हिनस्मि	हिंस्वः	हिंस्मः

'लृट्' भविष्यत्काल

प्र० पु०	हिंसिष्यति	हिंसिष्यतः	हिंसिष्यन्ति
म० पु०	हिंसिष्यसि	हिंसिष्यथः	हिंसिष्यथ
उ० पु०	हिंसिष्यामि	हिंसिष्यावः	हिंसिष्यामः

'लोट्' आज्ञावाचक

प्र० पु०	हिनस्तु = हिंस्तात्	हिंस्ताम्	हिंसन्तु
म० पु०	हिन्धि = हिंस्तात्	हिंस्तम्	हिंस्त
उ० पु०	हिनसानि	हिनसाव	हिनसाम

"लङ्" अनद्यतन भूतकाल

प्र० पु०	अहिनत् = अहिनद्	अहिंस्ताम्	अहिंसन्
म० पु०	अहिनः = अहिनत्	अहिंस्तम्	अहिंस्त
उ० पु०	अहिनसम्	अहिंस्व	अहिंस्म

विधिलिङ्

प्र० पु०	हिंस्यात्	हिंस्याताम्	हिंस्युः
म० पु०	हिंस्याः	हिंस्यातम्	हिंस्यात
उ० पु०	हिंस्याम्	हिंस्याव	हिंस्याम

आशीर्लिङ्

प्र० पु०	हिंस्यात्	हिंस्यास्ताम्	हिंस्यासुः
म० पु०	हिंस्याः	हिंस्यास्तम्	हिंस्यास्त
उ० पु०	हिंस्यासम्	हिंस्यास्व	हिंस्यास्म

"लुङ्" सामान्य भूतकाल

प्र० पु०	अहिंसीत्	अहिंसिष्टाम्	अहिंसिषुः
म० पु०	अहिंसीः	अहिंसिष्टम्	अहिंसिष्ट
उ० पु०	अहिंसिषम्	अहिंसिष्व	अहिंसिष्म

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'लृङ्' हेतुहेतु मद्भावभविष्यत्

प्र० पु०	अहिंसिष्यत्	अहिंसिष्यताम्	अहिंसिष्यन्
म० पु०	अहिंसिष्यः	अहिंसिष्यतम्	अहिंसिष्यत
उ० पु०	अहिंसिष्यम्	अहिंसिष्याव	अहिंसिष्याम

भञ्ज्=तोड़ना To break

'लट्' वर्तमानकाल

प्र० पु०	भनक्ति	भङ्क्तः	भञ्जन्ति
म० पु०	भनक्षि	भङ्क्थ;	भङ्क्थ
उ० पु०	भनज्मि	भञ्ज्वः	भञ्ज्मः

'लृट्' भविष्यकाल

प्र० पु०	भङ्क्ष्यति	भङ्क्ष्यतः	भङ्क्ष्यन्ति
म० पु०	भङ्क्ष्यसि	भङ्क्ष्यथः	भङ्क्ष्यथ
उ० पु०	भङ्क्ष्यामि	भङ्क्ष्यावः	भङ्क्ष्यामः

'लोट्' आज्ञावाचक

प्र० पु०	भनक्तु=भङ्क्तात्	भङ्क्ताम्	भञ्जन्तु
म० पु०	भङ्ग्धि=भङ्क्तात्	भङ्क्तम्	भङ्क्त
उ० पु०	भनजानि	भनजाव	भनजाम

"लङ्"अनद्यतन भूतकाल

प्र० पु०	अभनग्=अभनक्	अभङ्क्ताम्	अभञ्जन्
म० पु०	अभनः=अभनक्	अभङ्क्तम्	अभङ्क्त
उ० पु०	अभन्जम्	अभन्ज्व	अभन्ज्म

विधिलिङ्

प्र० पु०	भन्ज्यात्	भन्ज्याताम्	भन्ज्युः
म० पु०	भन्ज्याः	भन्ज्यातम्	भन्ज्यात
उ० पु०	भन्ज्याम्	भन्ज्याव	भन्ज्याम

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आशीर्लिङ्

प्र० पु०	भङ्ज्यात्	भज्यास्ताम्	भज्यासुः
म० पु०	भज्याः	भज्यास्तम्	भज्यास्त
उ० पु०	भज्यासम्	भज्यास्व	भज्यास्म

"लुङ्" सामान्य भूतकाल

प्र० पु०	अभाङ्क्षीत्	अभाङ्क्ताम्	अभाङ्क्षुः
म० पु०	अभाङ्क्षीः	अभाङ्क्तम्	अभाङ्क्त
उ० पु०	अभाङ्क्षम्	अभाङ्क्ष्व	अभाङ्क्ष्म

'लृङ्' हेतुहेतुमद्भाव भविष्यत्

प्र० पु०	अभङ्क्ष्यत्	अभङ्क्ष्यताम्	अभङ्क्ष्यन्
म० पु०	अभङ्क्ष्यः	अभङ्क्ष्यतम्	अभङ्क्ष्यत
उ० पु०	अभङ्क्ष्यम्	अभङ्क्ष्याव	अभङ्क्ष्याम

'भुज्' पालन करना, भोजन करना (To protect, to eat)

द्रष्टव्य—"भुज्" धातु का प्रयोग पालन अर्थ में परस्मैपद में होता है और भोजन करने के अर्थ में आत्मने पद में होता है।

रूप अगले पृष्ठ पर देखिए

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

"लट्" वर्तमान काल

प्र० पु०	भुनक्ति	भुङ्क्तः	भुञ्जन्ति	भुङ्क्ते	भुञ्जाते	भुञ्जते
म० पु०	भुनक्षि	भुङ्क्थः	भुङ्क्थ	भुङ्क्षे	भुञ्जाथे	भुङ्ध्वं
उ० पु०	भुनज्मि	भुञ्ज्वः	भुञ्ज्मः	भुञ्जे	भुञ्ज्वहे	भुञ्ज्महे

'लृट्' भविष्यत्काल

प्र० पु०	भोक्ष्यति	भोक्ष्यतः	भोक्ष्यन्ति	भोक्ष्यते	भोक्ष्येते	भोक्ष्यन्ते
म० पु०	भोक्ष्यसि	भोक्ष्यथः	भोक्ष्यथ	भोक्ष्यसे	भोक्ष्येथे	भोक्ष्यध्वे
उ० पु०	भोक्ष्यामि	भोक्ष्यावः	भोक्ष्यामः	भोक्ष्ये	भोक्ष्यावहे	भोक्ष्यामहे

"लोट्" आज्ञावाचक

प्र० पु०	भुनक्तु = भुङ्क्तात्,	भुङ्क्ताम्	भुञ्जन्तु	भुङ्क्ताम्	भुञ्जाताम्	भुञ्जताम्
म० पु०	भुङ्ग्धि = भुङ्क्तात्	भुङ्क्तम्	भुङ्क्त	भुङ्क्ष्व	भुञ्जाथाम्	भुङ्ध्वम्
उ० पु०	भुनजानि	भुनजाव	भुनजाम	भुनजै	भुनजावहै	भुनजामहै

विधिलिङ्

प्र० पु०	भुञ्ज्यात्	भुञ्ज्याताम्	भुञ्ज्युः	भुञ्जीत	भुञ्जीयाताम्	भुञ्जीरन्
म० पु०	भुञ्ज्याः	भुञ्ज्यातम्	भुञ्ज्यात	भुञ्जीथाः	भुञ्जीयाथाम्	भुञ्जीध्वम्
उ० पु०	भुञ्ज्याम्	भुञ्ज्याव	भुञ्ज्याम	भुञ्जीय	भुञ्जीवहि	भुञ्जीमहि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

"लङ्" अनद्यतन भूत

प्र० पु०	अभुनक्=अभुनग्	अभुङ्क्ताम्	अभुञ्जन्		अभुङ्क्त	अभुञ्जाताम्	अभुञ्जत
म० पु०	अभुनः=अभुनक्	अभुङ्क्तम्	अभुङ्क्त		अभुङ्क्थः	अभुञ्जाथाम्	अभुङ्ग्ध्वम्
उ० पु०	अभुञ्जम्	अभुञ्ज्व	अभुञ्ज्म		अभुञ्जि	अभुञ्ज्वहि	अभुञ्ज्महि

आशीर्लिङ्

प्र० पु०	भुज्यात	भुज्यास्ताम्	भुज्यासुः	भुक्षीष्ट	भुक्षीयास्ताम्	भुक्षीरन्
म० पु०	भुज्याः	भुज्यास्तम्	भुज्यास्त	भुक्षीष्ठाः	भुक्षीयास्थाम्	भुक्षीध्वम्
उ० पु०	भुज्यासम्	भुज्यास्व	भुज्यास्म	भुक्षीय	भुक्षीवहि	भुक्षीमहि

"लुङ्" सामान्य भूतकाल

प्र० पु०	अभौक्षीत्	अभौक्ताम्	अभौक्षुः	अभुक्त	अभुक्षाताम्	अभुक्षत
म० पु०	अभौक्षीः	अभौक्तम्	अभौक्त	अभुक्थाः	अभुक्षाथाम्	अभुग्ध्वम्
उ० पु०	अभौक्षम्	अभौक्ष्व	अभौक्ष्म	अभुक्षि	अभुक्ष्वहि	अभुक्ष्महि

"लृङ्" हेतु हेतु मद्भाव भविष्यत्

प्र० पु०	अभोक्ष्यत्	अभोक्ष्यताम्	अभोक्ष्यन्	अभोक्ष्यत्	अभोक्ष्येताम्	अभोक्ष्यन्त
म० पु०	अभोक्ष्यः	अभोक्ष्यतम्	अभोक्ष्यत	अभोक्ष्यथाः	अभोक्ष्येथाम्	अभोक्ष्यध्वम्
उ० पु०	अभोक्ष्यम्	अभोक्ष्याव	अभोक्ष्याम	अभोक्ष्ये	अभोक्ष्यावहि	अभोक्ष्यामहि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi
CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रुधादिगण के उदाहरण

१—गोपाः गौशालायां गाः अरुणत्=ग्वाले ने गौशाला में गायों को रोका The milkman impeded the cows in the cowpen.

२— शास्त्रं हृदयस्य ग्रन्थिं छिनत्ति=शास्त्र हृदय का अन्धकार काटता है The science removes the ignorance of heart.

३—गणितज्ञोऽङ्कान् युनक्ति=गणितज्ञ अङ्कों को जोड़ता है। The mathematician adds the figures.

४—मोहनो माम् औनत्=मोहन ने मुझे भिगो दिया। Mohan weted me.

५—दासी गोधूमान् पिनष्टि=नौकरानी गेहूँ पीसती है। Maid servant grinds the wheat.

६—सोहनो मम कलशमभनक्=सोहन ने मेरा घड़ा तोड़ दिया Sohan broke my pitcher

७—इन्धनानि चुल्हिकायाम् इन्धते=लकड़ियाँ चूल्हा में प्रदीप्त होती हैं। woodsticks flare in the hearth.

अभ्यास

हिन्दी में अनुवाद कीजिये।

मातेव रक्षति पितेव हिते नियुङ्क्ते,
कान्तेव चाभिरमयत्यपनीय खेदम्।
कीर्तिञ्च दिक्षु विमलां वितनोति लक्ष्मीं,
किं किं न साधयति कल्पलतेव विद्या।

१—असिना शत्रून्छिनत्ति २—पिण्ढि गोधूमान् ३—पिण्ढि ओषधीः ४—मा हिन्धि कान्। ५—सा तं मलं रिणक्ति ६—किं दासः काष्टम् अभिनत्? ७—किं दासी पिष्टिं पिनष्टि? ८—वयं न केनापि हिंस्याम ९—सुरेन्द्रो लेखनीम भाङ्क्षीत्। १०—भङ्ग्धि मम बन्धनं येनाहं बहिरागच्छेयम् ११—किं संख्यामयुनक्? १२—किमिन्धनानि ऐन्धत? १३—किं त्वं पिष्टिं पेष्स्यसि १४—मम वस्त्रमौनत् १५ स मलमरिणक्।

संस्कृत में अनुवाद कीजिये।

(१) ग्वाला गायों को गौशाले में रोकता है (२) नौकर लकड़ी फाड़ता है (३) नौकरानी आटा पीसती है। (४) क्या लकड़ियाँ प्रदीप्त हो गईं? (५) गोविन्द ने मेरी कलम तोड़ दी (६) तुझे किसी को नहीं मारना चाहिये (७) तुम मेरे बन्धन तोड़ो (८) देवेन्द्र ने घड़े को तोड़ दिया (९) क्या बढ़ई पाया में छेद करता है (१०) लड़के हिसाब जोड़ते हैं (११) वह वस्त्रों को पानी से भिजाता है। (१२) मैं भोजन करता हूँ (१३) राजा पृथिवी को भोगता है (१४)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पञ्चदशोऽध्यायः

प्रथम पाठः

अथ तनादिगण प्रकरणम्

नियम—इस गण में प्रत्यय से पूर्व और धातु के अन्त में "उ" विकरण जोड़कर पुनः उकार को ओ गुणकर देते हैं। तन्+उ+ति=तनोति रूप बना। इसी प्रकार सर्वत्र जान लेना चाहिये।

तन्=फैलाना To spread

"लट्" वर्तमान काल

	परस्मैपदी			आत्मनेपदी		
प्र० पु०	तनोति	तनुतः	तन्वन्ति	तनुते	तन्वाते	तन्वते
म० पु०	तनोषि	तनुथः	तनुथ	तनुषे	तन्वाथे	तनुध्वे
उ० पु०	तनोमि	तनुवः तन्वः	तनुमः तन्मः	तन्वे	तनुवहे	तनुमहे

"लिट्" परोक्षभूतकाल

प्र० पु०	ततान	तेनतुः	तेनुः	तेने	तेनाते	तेनिरे
म० पु०	तेनिथ	तेनथुः	तेन	तेनिषे	तेनाथे	तेनिध्वे
उ० पु०	ततान	तेनिव	तेनिम	तेने	तेनिवहे	तेनिमहे

"लुट्" अनद्यतन भविष्यत्काल

प्र० पु०	तनिता	तनितारौ	तनितारः	तनिता	तनितारौ	तनितारः
म० पु०	तनितासि	तनितास्थः	तनितास्थ	तनितासे	तनितासाथे	तनिताध्वे
उ० पु०	तनितास्मि	तनितास्वः	तनितास्मः	तनिताहे	तनितास्वहे	तनितास्महे

"लृट्" सामान्य भविष्यत्काल

प्र० पु०	तनिष्यति	तनिष्यतः	तनिष्यन्ति	तनिष्यते	तनिष्येते	तनिष्यन्ते
म० पु०	तनिष्यसि	तनिष्यथः	तनिष्यथ	तनिष्यसे	तनिष्येथे	तनिष्यध्वे
उ० पु०	तनिष्यामि	तनिष्यावः	तनिष्यामः	तनिष्ये	तनिष्यावहे	तनिष्यामहे

"लोट्" आज्ञावाचक

प्र० पु०	तनोतु=तनुतात्,	तनुताम्	तन्वन्तु	तनुताम्	तन्वाताम्	तन्वताम्
म० पु०	तनु=तनुतात्	तनुतम्	तनुत	तनुष्व	तन्वाथाम्	तनुध्वम्
उ० पु०	तनवानि	तनवाव	तनवाम	तनवै	तनवावहै	तनवामहै

"लङ्" अनद्यतन भूतकाल

प्र० पु०	अतनोत्	अतनुताम्	अतन्वन्	अतनुत	अतन्वाताम्	अतन्वत
म० पु०	अतनोः	अतनुतम्	अतनुत	अतनुथाः	अतन्वाथाम्	अतनुध्वम्
उ० पु०	अतनवम्	अतनुव	अतनुम	अतन्वि	अतनुवहि	अतनुमहि

विधिलिङ्

प्र० पु०	तनुयात्	तनुयाताम्	तनुयुः	तन्वीत	तन्वीयाताम्	तन्वीरन्
म० पु०	तनुयाः	तनुयातम्	तनुयात	तन्वीथाः	तन्वीयाथाम्	तन्वीध्वम्
उ० पु०	तनुयाम्	तनुयाव	तनुयाम	तन्वीय	तन्वीवहि	तन्वीमहि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi
CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आशीर्लिङ्

प्र० पु०	तन्यात्	तन्यास्ताम्	तन्यासुः	तनिषीष्ट	तनिषीयास्ताम्	तनिषीरन्
म० पु०	तन्याः	तन्यास्तम्	तन्यास्त	तनिषीष्ठाः	तनिषीयास्थाम्	तनिषीध्वम्
उ० पु०	तन्यासम्	तन्यास्व	तन्यास्म	तनिषीय	तनिषीवहि	तनिषीमहि

"लुङ्" सामान्य भूतकाल

प्र० पु०	अतानीत्	अतानिष्टाम्	अतानिषुः	अतत=अतनिष्ट,	अतनिषाताम्	अतनिषत
म० पु०	अतानीः	अतानिष्टम्	अतानिष्ट	अतथाः=अतनिष्ठाः	अतनिषाथाम्	अतनिध्वम्
उ० पु०	अतानिषम्	अतानिष्व	अतानिष्म	अतनिषि	अतनिष्वहि	अतनिष्महि

सामान्यभूत (परस्मै पद का दूसरा रूप)

प्र० पु०	अतनीत्	अतनिष्टाम्	अतनिषुः
म० पु०	अतनीः	अतनिष्टम्	अतनिष्ट
उ० पु०	अतनिषम्	अतनिष्व	अतनिष्म

"लृङ्" हेतुहेतुमद् भाव भविष्यत्

प्र० पु०	अतनिष्यत्	अतनिष्यताम्	अतनिष्यन्	अतनिष्यत	अतनिष्येताम्	अतनिष्यन्त
म० पु०	अतनिष्यः	अतनिष्यतम्	अतनिष्यत	अतनिष्यथाः	अतनिष्येथाम्	अतनिष्यध्वम्
उ० पु०	अतनिष्यम	अतनिष्याव	अतनिष्याम	अतनिष्ये	अतनिष्यावहि	अतनिष्यामहि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi
CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कृ=करना To do

वर्तमान काल

प्र० पु०	करोति	कुरुतः	कुर्वन्ति	कुरुते	कुर्वाते	कुर्वते
म० पु०	करोषि	कुरुथः	कुरुथ	कुरुषे	कुर्वाथे	कुरुध्वे
उ० पु०	करोमि	कुर्वः	कुर्मः	कुर्वे	कुर्वहे	कुर्महे

"लिट्" परोक्षभूतकाल

प्र० पु०	चकार	चक्रतुः	चक्रुः	चक्रे	चक्राते	चक्रिरे
म० पु०	चकर्थ	चक्रथुः	चक्र	चकृषे	चक्राथे	चकृध्वे
उ० पु०	चकार	चकृव	चकृम	चक्रे	चकृवहे	चकृमहे

"लुट्" अनद्यतन भविष्यत्काल

प्र० पु०	कर्ता	कर्तारौ	कर्तारः	कर्ता	कर्तारौ	कर्तारः
म० पु०	कर्तासि	कर्तास्थः	कर्तास्थ	कर्तासे	कर्तासाथे	कर्ताध्वे
उ० पु०	कर्तास्मि	कर्तास्वः	कर्तास्मः	कर्ताहे	कर्तास्वहे	कर्तास्महे

"लृट्" सामान्य भविष्यत्काल

प्र० पु०	करिष्यति	करिष्यतः	करिष्यन्ति	करिष्यते	करिष्येते	करिष्यन्ते
म० पु०	करिष्यसि	करिष्यथः	करिष्यथ	करिष्यसे	करिष्येथे	करिष्यध्वे
उ० पु०	करिष्यामि	करिष्यावः	करिष्यामः	करिष्ये	करिष्यावहे	करिष्यामहे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi
CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

"लोट्" आज्ञावाचक

प्र० पु०	करोतु=कुरुतात्	कुरुताम्_	कुर्वन्तु	कुरुताम्_	कुर्वाताम्_	कुर्वताम्_
म० पु०	कुरु=कुरुतात्,	कुरुतम्_	कुरुत	कुरुष्व	कुर्वाथाम्_	कुरुध्वम्_
उ० पु०	करवाणि	करवाव	करवाम	करवै	करवावहै	करवामहै

"लङ्" अनद्यतन भूतकाल

प्र० पु०	अकरोत्	अकुरुताम्_	अकुर्वन्	अकुरुत	अकुर्वाताम्_	अकुर्वत
म० पु०	अकरोः	अकुरुतम्_	अकुरुत	अकुरुथाः	अकुर्वाथाम्_	अकुरुध्वम्_
उ० पु०	अकरवम्_	अकुर्व	अकुर्म	अकुर्वि	अकुर्वहि	अकुर्महि

विधिलिङ्_

प्र० पु०	कुर्यात्	कुर्याताम्_	कुर्युः	कुर्वीत	कुर्वीयाताम्_	कुर्वीरन्
म० पु०	कुर्याः	कुर्यातम्_	कुर्यात	कुर्वीथाः	कुर्वीयाथाम्_	कुर्वीध्वम्_
उ० पु०	कुर्याम्_	कुर्याव	कुर्याम	कुर्वीय	कुर्वीवहि	कुर्वीमहि

आशीर्लिङ्_

प्र० पु०	क्रियात्	क्रियास्ताम्_	क्रियासुः	कृषीष्ट	कृषीयास्ताम्_	कृषीरन्
